दिनाङ्क:-06.01.2026 प्रात: - 06:55

## अथ वार्ताः

### पीएम-सोमनाथ

सोमनाथमन्दिरस्य गतशताधिकवर्षाणाम् अस्तित्वं देशस्य सुदृढसंस्कृतेः भावं प्रतिबिम्बयति इति प्रधानमन्त्रिणा नरेन्द्रमोदिना उक्तम्। सः अवदत् यत्, पुनः पुनः आक्रमणेषु, विपत्सु च अपि सोमनाथमन्दिरं निरन्तरं उन्नतं वर्तते। षड्विंशत्यधिकैकशततमे वर्षे जाते सोमनाथ-देवालयस्य उपरि प्रथम-आक्रमणस्य सहस्रवर्षाणां ऐतिहासिक अवसरे ओपी-एड् इत्यस्मिन् निदर्शनं कुर्वन् प्रधानमन्त्री उक्तवान्, सोमनाथ-शब्दं श्रुत्वा जनानां हृदयेषु मन:सु च अभिमानस्य अनुभूतिः भवति। सः अवदत् यत्, एतत् देशस्य आत्मन: नित्यघोष: अस्ति तथा च एतत् भव्यं मन्दिरं देशस्य पश्चिमतटे गुजरातराज्ये स्थित: अस्ति। सोमनाथ-मन्दिरस्य जीर्णोद्धारार्थं योगदानकर्तृणां प्रयत्नानां प्रशंसां कुर्वन् प्रधानमन्त्री अवदत् यत्, पुनः प्रतिष्ठापितं मन्दिरं भक्तानां कृते उद्घाटनानन्तरं षड्विंशत्यधिक-द्विसहस्रतमे वर्षे पञ्चसप्तति वर्षाणि पूरयित्वा अन्यं महत्त्वपूर्णं लक्ष्यं प्राप्स्यति। प्रधानमन्त्री मोदी अवदत् यत् षड्विंशत्यधिकैकसहस्रतमे तमे वर्षे जनवरीमासे महमूदः गज़नी-इत्येषः अस्य मन्दिरस्य उपरि आक्रमणं कृतवान्, हिंसात्मकेन आक्रमणेन आस्थायाः सभ्यतायाः च महान् प्रतीकं नाशयितुं प्रयतितवान्। श्रीमोदिना दृश्य-श्रव्य-माध्यमेन उक्तं यत्, सहस्रवर्षाणाम् अनन्तरं अपि, सोमनाथस्य वैभवं पुनः स्थापयितुं असंख्य-प्रयत्नैः इदं मन्दिरं अद्यापि तथैव-वैभवयुतं वर्तते।

अत्रान्तरे, प्रधानमन्त्री नरेन्द्रमोदी रविवासरे गुजरात-स्थितस्य सोमनाथमन्दिरस्य भ्रमणं करिष्यति।

### गृहमन्त्री अमित शाह:

केन्द्रीय गृहमन्त्री अमित शाह: अद्य नवदेहल्यां विज्ञानभवने पोषणसुरक्षायां कुपोषणनिवारणे च कॉर्पोरेट-सामाजिक-उत्तरदायित्वस्य भूमिका इति विषयम् अधिकृत्य सी.एस्.आर्.-सम्मेलनस्य उद्घाटनं विधास्यति। सम्मेलनस्यास्य उद्देश्यं तावत् बालेषु कुपोषणं निवारणं वर्तते सममेव सहकार्यात्मक-नवीन-कार्यनीतीनां विषये विचारविमर्शः च वर्तते। एन्.डी.डी.बी. इति राष्ट्रीयदुग्धविकासमण्डलेन सम्मेलनमिदं अयोजितम्। अत्रावधौ श्री शाहः सीएसआर-उपक्रमस्य अन्तर्गतं शिशु संजीवनी कार्यक्रमं च आरप्स्यति। एषः कार्यक्रमः महाराष्ट्रस्य नागपुरजनपदस्य ग्रामीणक्षेत्रेषु विद्यमानेषु आङ्गनवाडीकेन्द्रेषु अध्ययनं कुर्वद्भ्यः प्रायः त्रि सहस्र बालकेभ्यः पोषणसहायतां प्रदास्यति।

### शिक्षा मन्त्री - धर्मेन्द्र प्रधानः

केंद्रीयशिक्षा मन्त्री धर्मेन्द्र प्रधानः अद्य नवदेहल्यां शास्त्रीय कन्नड, तेलुगु, मलयालम, ओडिया भाषाणां उत्कृष्टताकेन्द्रैः निर्मितानि एकचत्वारिंशत् पुस्तकानि प्रकाशयिष्यति। एताः कृतयः भारतीयभाषाकेन्द्रेण विकसिताः सन्ति। अस्मिन् कार्यक्रमे केन्द्रीयशास्त्रीयतमिलभाषाकेन्द्रेण निर्मितायाः तिरुक्कुरल ग्रन्थमालायाः पंचचत्वारिंशत्-अङ्कयुक्तायाः आङ्गिकभाषायाः व्याख्याशृङ्खलया सह त्रयोदश पुस्तकानाम् विमोचनम् अपि भविष्यति।

### क्रिकेट-अंडर-19

अण्डर्-19 पुरुष-क्रिकेट्-क्रीडायां, बेनोनी-नगरस्य विलोमूर्-पार्क्-इत्यत्र तिसृणां-क्रीडा-श्रृङ्खलायाः द्वितीये-एकदिवसीय-क्रीडायां आतिथेय-दक्षिण-अफ्रिकादलेन पूर्वं भारताय षड्चत्वारिंशदधिक-द्विशत-धवनांकानां लक्ष्यं प्रदत्तम् आसीत्। अवधेयम् यत् भारतीयदलेन दक्षिणाफ्रिका-दलस्योपरि विजयम् अवाप्तम्।

।।इति वार्ता:।।